संस्कृत-वार्ता:

03.12.2025

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· सञ्चार्-साथी-चलदूरभाषीय तन्त्रान्शस्य वर्धमानस्य स्वीकार्यतायाः दृष्ट्या, सर्वकारेण दूरवाण्याम् अस्य तन्त्रान्शस्य पूर्वस्थापनम् अनिवार्यं न कर्तुं निर्णयः कृतः अस्ति।

· प्रधानमन्त्रिणा नरेन्द्रमोदिना दिव्याङ्गजनानां कृते सम्मानं, सुलभतां, समानावकाशा: च सुनिश्चेतुं सर्वकारस्य संकल्पं पुनः दृढीकृतम्।

· सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः अवदत् यत् मिथ्या-वार्ता लोकतन्त्रस्य कृते विभीषिका अस्ति। सः अवदत् यत्, सर्वकारः भारतीय-प्रेस-परिषद् च उभावपि कस्यापि टी. वी.-वाहिन्याः वार्तापत्रस्य वा विरुद्धं प्राप्त परिवादान् सक्रियतया पश्यन्तौ स्तः।

· पुरुष-क्रिकेट-क्रीडायां, रायपुर-नगरस्य शहीद-वीर-नारायण-सिंह-अन्ताराष्ट्रिय-क्रीडाङ्गणे तिसृषु-एकदिवसीय-क्रीडा-शृङ्खलाषु द्वितीयायां क्रीडायां दक्षिण-आफ़्रिका-देशस्य सम्मुखे भारतेन नव-पञ्चाशदधिक-त्रिशतं धावकानां लक्ष्यं स्थापितम्।

<u>सिन्धिया - सञ्चार्-साथी</u>

सञ्चार्-साथी- चलदूरभाषीय तन्त्रान्शस्य वर्धमानस्य स्वीकार्यतायाः दृष्ट्या, सर्वकारेण दूरवाण्याः निर्मातृभ्यः अस्य तन्त्रान्शस्य पूर्वस्थापनम् अनिवार्यं न कर्तुं निर्णयः कृतः अस्ति। सर्वकारेण स्पष्टीकृतम् यत् नागरिकाः यदा इच्छन्ति तदा तन्त्रान्शं निष्कासयितुं शक्नुवन्ति तथा च तन्त्रान्शे उपयोक्तॄणां रक्षणम् अतिरिच्य अन्यत् किमपि कार्यं नास्ति इति। सञ्चारमन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत् अद्यावधि चत्वारि दशमलवोत्तर एक कोटिजनाः उपयोक्तारः सञ्चार साथी तन्त्रान्शं स्थापितवन्तः। केन्द्रीय-सञ्चार-मन्त्री ज्योतिरादित्य-सिन्धिया अद्य विपक्षस्य गूढचर्यायाः आरोपान् निराकृतवान्, सः अवदत् यत् सञ्चार्-साथी-ऐप-द्वारा गूढचर्या न सम्भवः, न भविष्यतीति। अद्य लोकसभायाम् एकस्य प्रश्नस्य प्रत्युत्तरे श्री सिन्धिया-वर्यः स्पष्टं कृतवान् यत् उपयोक्तारः स्वसौख्येन पञ्जीकरणं कृत्वा अस्य लाभान् प्राप्तुं ऐप-इत्येतं सक्रियं कर्तुं शक्नुवन्ति, तथा

च ते कदापि स्वस्य उपकरणात् तत् निष्क्रियं निष्कासयितुं वा शक्नुवन्ति। सः अवदत् यत्, नरेन्द्रमोदिनः प्रशासनेन नागरिकान् कपटक्रियाकलापात् रक्षितुं एषा सुविधा प्रदत्तास्ति।

मोदी-दिव्याङ्ग

प्रधानमन्त्रिणा नरेन्द्रमोदिना दिव्याङ्गजनानां कृते सम्मानं, सुलभतां, समानावकाशाः च सुनिश्चेतुं सर्वकारस्य संकल्पं पुनः दृढीकृतम्। सामाजिक-पटले लिखिते सन्देशे श्रीमोदी अवदत् यत्, दिव्यांगजनाः स्वस्य सृजनात्मकतायाः दृढनिश्चयस्य च माध्यमेन विविधक्षेत्रेषु उत्कृष्टतां प्राप्तवन्तः। श्री मोदी अवदत् यत्, भारते विधिद्वारा, सुलभसंरचनायाः माध्यमेन, समावेशीशिक्षानीतेः माध्यमेन, सहायकप्रौद्योगिकीनां नवप्रकल्पनानां माध्यमेन च दिव्यांगजन-कल्याणाय प्रतिबद्धतां दृढीकृतवान्।

राष्ट्रपतिः -दिव्यांग

राष्ट्रपतिः द्रौपदी मुर्मुः अद्य अवदत् यत् समाजं यथार्थरूपेण विकसितः तदा एव वक्तुं शक्यते यदा दिव्यांगजनैः सह समानव्यवहारः भवेत्। सा अवोचत् यत् तेषां प्रति अनुकम्पया न, अपितु आदरेन सम्मानेन च व्यवहारः करणीयः। राष्ट्रपतिः नवदिल्ल्यां दिव्यांगजनानां सशक्तीकरणस्य राष्ट्रियपुरस्काराणां समये एतत् उक्तवती। अस्मिन् कार्यक्रमे सा निःशक्तजनानां शक्तीकरणार्थं व्यक्तिनां संस्थानां च अनुकरणीयप्रयासानां कृते राष्ट्रियपुरस्कारान् प्रदत्तवती। कार्यक्रमं संबोधयन्ती राष्ट्रपतिः प्रोक्तवती यत् तेषाम् अविश्वसनीय-उपलब्धयः सर्वेषां कृते प्रेरणां अस्ति। विशेषतः क्रीडायाः माध्यमेन तेषां उन्नत्यै सर्वकारस्य भूमिकाम् अपि सा प्रकशितवती।

वैष्णवः -मिथ्या-वार्ताः

सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः अवदत् यत् मिथ्या-वार्ता लोकतन्त्रस्य कृते विभीषिका अस्ति। सः सामाजिक- पटलेषु, मिथ्या-वार्तासु, तथा ए. आई.-द्वारा निर्मितेषु गहन-मिथ्या-वार्तासु कठोर-कार्याचरणस्य आवश्यकतायाः विषये अवधानं दत्तवान्। अद्य लोकसभायां प्रश्नकाले प्रत्युत्तरे श्रीवैष्णव अवदत् यत्, ए. आई. इत्यनेन उत्पद्यमानानां गहन-मिथ्याचरणां अभिज्ञानार्थं, तेषां विरुद्धं कार्याचरणाय च नूतनः प्रारूप-नियमः प्रकाशितः अस्ति। सः अवदत् यत्, सर्वकारः

भारतीय-प्रेस-परिषद् च उभावपि कस्यापि टी. वी.-वाहिन्याः वार्तापत्रस्य वा विरुद्धं प्राप्त परिवादान् सक्रियतया पश्यन्तौ स्तः।

विश्व- ऋतु-सङ्घटन

विश्व- ऋतु-सङ्घटनेन (डब्ल्यू. एम. ओ.) इत्यनेन एशिया-महाद्वीपे प्रचण्ड वृष्ट्या प्राणघातकजलप्लावनस्य सञ्चेतना प्रसारिता। विनाशकारि-प्रावृट्-वृष्ट्या, उष्णकटिबन्धीय-चक्रवातेन च दक्षिण-दक्षिणपूर्व-एशिया-खण्डेषु विनाशकारि-जलप्लावनं जातम्, शतशः जनाः मृताः, समुदायाः विस्थापिताः, प्रमुखाः आर्थिकावधानं च जातम् इति विश्व-ऋतु-सङ्घटनेन (डब्ल्यू. एम्. ओ.) इत्यनेन मङ्गलवासरे जिनेवा-नगरे संयुक्तराष्ट्रसङ्घस्य वार्ताहर-सम्मेलने उक्तम्। डब्ल्यू. एम्. ओ. अधिकारिणा क्लेयर नुलिस इत्येषा अकथयत् यत् फिलिपीन्स्, थाईलैण्ड्, वियतनाम्, श्रीलङ्का देशाः च इत्येतेषु देशेषु सर्वाधिकं प्रभाविताः सन्ति।

वैष्णवः-अमृतभारत

रेल्मन्त्री अश्विनी वैष्णवः अवदत् यत् अमृतभारत्-स्थानक-योजनायाः अन्तर्गतं पञ्चोत्तरैकशत रेलस्थानकानां कार्यम् पूर्णम्। लोकसभायां एकस्य प्रश्नस्य लिखित-प्रत्युत्तरे श्री वैष्णवः अवदत् यत् एषा योजना प्रतीक्षालयः, शौचालयः, आसनव्यवस्था, पेयजलानि वाहन-स्थापन-क्षेत्राणि तथा दिव्यांजनानां कृते सुविधाभिः सह रेलस्थानकानाम् उन्नतीकरणे केन्द्रिता अस्ति।

प्रह्लाद-जोशी

केन्द्रीय-खाद्य-सार्वजनिक-वितरण-उपभोक्तृ-कार्य-मन्त्रिणा प्रह्लाद-जोशी-इत्यनेन उक्तं यत्, सम्पूर्णे देशे प्रायः शतप्रतिशतं खाद्यापूर्ति-पत्राणि अधुना डिजिटल-रूपेण सन्ति इति। लोकसभायामद्य प्रश्नोत्तरकाले अनुपूरक-प्रश्नानामुत्तराय श्री-जोशी अवदत् यत् प्रायः सर्वे विंशति दशमलव अष्टपञ्चाशत् कोटिषु गृहेषु खाद्यापूर्ति-पत्राणि डिजिटलीकृतानि सन्ति। असौ उक्तं यत् प्रशासनं प्रधानमन्त्री-निर्धन-कल्याण-अन्न-योजनायाः अन्तर्गतं लाभार्थिभ्यः निःशुल्कम् अन्नं

ददाति, यत् ऊनविंशत्यधिक-द्विसहस्र-वर्ष-पर्यन्तं प्रवर्तते इति। अस्याः योजनायाः अन्तर्गतं योग्याः परिवाराः प्रतिव्यक्तिः प्रतिमासं पञ्च किलोग्राम निःशुल्कम् अन्नधान्यं प्राप्नुयुः।

धर्मेन्द्र-प्रधानः

केन्द्रीय-शिक्षा-मन्त्री धर्मेन्द्र-प्रधानः राज्यसभायाम् अवदत् यत् राष्ट्रिय-शिक्षा-नीतिः मातृभाषा-आधारित-शिक्षां प्रवर्धयति। समग्र-शिक्षा-अभियानम्, एन्.ई.पी. तथा पी.एम्.-श्री-योजना परस्परं सम्बद्धानि सन्ति तथा समग्र-शिक्षा-अभियानम् अपि राष्ट्रिय-शिक्षा-नीते: अनुशंसया सह सम्बद्धम् अस्ति इति सः सूचितवान्।

क्रिकेट

पुरुष-क्रिकेट-क्रीडायां, रायपुर-नगरस्य शहीद-वीर-नारायण-सिंह-अन्ताराष्ट्रिय-क्रीडाङ्गणे तिसृषु-एकदिवसीय-क्रीडा-शृङ्खलासु द्वितीयायां क्रीडायां दक्षिण-आफ़्रिका-देशस्य सम्मुखे भारतेन नव-पञ्चाशदधिक-त्रिशतं धावकानां लक्ष्यं स्थापितम्।

।। इति वार्ताः ।।